Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 6 | ISSN : 2581- 6306

# धर्मशास्त्रदिशा स्त्रीधनविमर्शः

**लक्ष्मीनारायण जेना**
**शोधच्छात्रः**
**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः**

**Article Info**
Volume 3, Issue 6
Page Number: 55-59
Publication Issue :
November-December-2020

**Article History**
Accepted : 01 Dec 2020
Published : 15 Dec 2020

या कन्या अविवाहिता भवति सा पुत्रभागानुसारेण तच्चतुर्थांशं प्राप्नोति । तत्र जीमूतवाहनेन कथ्यते यत् "समांशा मातरस्त्वेषां तुरीयांशाश्च कन्यका" इति । एवं बृहस्पतेः वचनमुत्थाय उच्यते यत् "अनूढानां दुहितॄणां पुत्रभागमनुसृत्य तच्चतुर्थांशः" इति प्रतिपाद्यते । अत्रायमभिप्रायो यत् पुत्रस्य भागत्रयं कन्यायाः एको भागः इति । पुनश्च कात्यायनमहर्षिवचनमुद्धृत्य कथ्यते यत् स्वल्पधने पुत्राणां त्रयो भागाः कन्यायाश्चैको भाग इति । यथोक्तं तेन –

कन्यकानां त्वदत्तानां चतुर्थो भाग इष्यते ॥
पुत्राणाञ्च त्रयो भागा स्वाम्यां स्वल्पधने स्मृतम् ॥ इति ॥

अपि च मनुः अब्रवीत् यत् भ्रातरः पृथक् पृथक् स्वस्वभागेभ्यो चतुर्थांशमुद्धृत्य कन्याभ्यो दद्युरन्यथा ते पतिताः स्युरिति प्रतिपादितम् । तेनोक्तं यथा –

स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक् ।
स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः ॥ इति ॥

---

एतेन अवगम्यते यत् प्रदद्युरिति प्रदानश्रुतेः अदाने च पातित्यश्रुतेश्च भ्रातरः कृपया भगिनीभ्यो धनं दद्युरिति । अतः काचित्कन्या अधिकारिबुद्ध्या स्वभ्रातृभ्यो धनं न गृह्णीयात् । न हि कश्चिद् भ्राता कृपया स्वभ्रात्रे किञ्चिदंशं ददाति । कन्याभ्य एतद्धनदानं तु तासां विवाहसंस्कारार्थमेव । अतो भगिनीनां विवाहसंस्कारार्थं भ्रातृभिरेकचतुर्थांशं धनं प्रदेयम् । एतच्च स्वल्पधने वेदितव्यम् । भ्रातुर्बहुतरे धने सति केवलं विवाहोचितमेव धनं दातव्यं न तत्र चतुर्थांशनियमः । पुनश्च चतुर्थांशनियमोऽयं पुत्रकन्ययोः समसंख्यात्वे ज्ञातव्यं विषमसंख्यात्वे च कन्याया एव बहुतरधनं वा स्यात्, पुत्रस्य वा निर्द्धनता स्यात्, न चैतदुचितं पुत्रस्य प्राधान्यादिति जीमूतवाहनेन स्पष्टतया प्रत्यपादि ।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अनेन प्रकारेण भागे क्रियमाणे यदि कस्यचित् एकः पुत्रः एका च कन्या तर्हि पैतृकाणि शतं रूप्यकाणि विभज्य पुत्रः पञ्चसप्ततिः रूप्यकाणि कन्या च पञ्चविंशतिः रूप्यकाणि प्राप्नोति । एतेन पुत्रभागस्य तृतीयांशं खलु कन्या प्राप्नोति येन चतुर्थांशनियमस्य व्यभिचारो भवति । अपि च सर्वत्र परिवारे पुत्रकन्ययोः समसंख्यात्वं सर्वथा न सम्भवति । विषमसंख्यात्वे तु नियमान्तरं न प्रदर्शितं प्रत्युत दोष एव प्रकटितः । इमां स्थितिं पुत्रं भागचतुष्टयं प्रति कन्यां चैकं भागं कल्पयित्वा यदि विभागः क्रियते, तर्हि सर्वं समञ्जसं स्यादिति मे मतिः । अर्थात् यस्य एकः पुत्रः एका च कन्या, तस्य धनं पञ्चधा विभज्य एकं भागं कन्यायै दत्वाऽवशिष्टं यदि पुत्रो गृह्णाति, तर्हि कन्या पुत्रस्य चतुर्थांशं प्राप्नोत्येव । पुनश्च यदि कस्यचिदेकः पुत्रः द्वे कन्ये तर्हि धनसमुदायः षोढा विभज्य तत्र एकैकं भागं कन्याभ्यो दत्वाऽवशिष्टं पुत्रो गृह्णीयात् । अथ कस्यचिद् द्वौ पुत्रौ एका च कन्या चेत् तस्य धनसमुदायं नवधा विभज्य एकं भागं कन्यायै दत्वा प्रतिपुत्रं भागचतुष्टयं दद्यात् । एतेन सर्वास्ववस्थासु पुत्रभागमनुसृत्य कन्या एकचतुर्थांशमेव प्राप्नोति । अत्र पुत्रकन्ययोर्विषमसंखयात्वेऽपि न काप्यापत्तिः स्यादिति वक्तुं शक्यते ।

**स्त्रीधनशब्दार्थः**

स्त्रीधनशब्दः न यौगिकः, यतो हि स्त्रिया धनं स्त्रीधनम् इति व्युत्पत्तिः न समीचीना । स्त्रिया अर्जितेऽपि धने तत्र अस्या अनधिकारदर्शनात् । प्रसङ्गेऽस्मिन्नुक्तं मनुना यत् –

भार्य्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः ।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥

एतेन स्त्रिया अर्जितेऽपि धने तस्या अस्वातन्त्र्यादनधिकार इति । अत एव स्त्रिया धनं न स्त्रीधनं किन्तु

पितृ-मातृ-सुत-भ्रातृ-दत्तमध्यग्न्युपागतम् ।
आधिवेदनिकं बन्धुदत्तं शुल्कान्वाधेयकम् ॥ इति ॥

एतेन विष्णुवचनेन ज्ञायते यद्धनविशेषे स्त्रीधनशब्दः पारिभाषिकः न तु यौगिकः इति । विज्ञानेश्वरमित्रमिश्रयोर्मतानुसारेण स्त्रीस्वामिकं धनं स्त्रीधनमिति व्युत्पत्त्या स्त्रीधनशब्दः यौगिक इति प्रतिपाद्य योगसम्भवे परिभाषया अन्याय्यत्वादिति यद्यपि युक्तिः प्रदर्शिता, तथापि जीमूतवाहनमते स्त्रीधनशब्दः पारिभाषिकः न तु यौगिकः इति प्रतिपादिम् । स्त्रिया शिल्पादिप्राप्तधने तस्याः स्वामित्वाभावात् तद्भर्त्तुरिव स्वामित्वाच्च तद्धनं न स्त्रीधनम् । अतः स्त्रीधनशब्दः पारिभाषिक इति जीमूतवाहनस्याभिप्रायः ।

**स्त्रीधनस्य स्वरूपम्**

यद्धनं स्त्रियै स्वच्छन्दभावेन व्ययीकरणार्थं प्रदीयते तदेव स्त्रीधनम् । स्त्री स्वयं श्रमेण यदर्जयति तत्र तस्याः स्वान्याभावात् तद्भर्त्ता तद्धनेऽधिकारी भवति । अतः स्त्रिया स्वार्जितं धनं न स्त्रीधनम् । किन्तु तत् पितृमातृभ्रातृपतिपुत्रादिभिः सम्बन्धिभिः कृपया स्वेच्छया व्ययीकरणार्थं दीयमानं धनं स्त्रीधनमिति । तच्च धनमनेकविधम् । प्रसङ्गेऽस्मिन् मनुना प्रतिपादितं यत् –

अध्यग्न्यध्यावाहनिकं दत्तञ्च प्रीतिकर्मणि ।

भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥ इति ॥

एतान्यतिरिच्यापि अन्वाधेयाधिवेदनिक-भर्तृदत्त-पुत्रदत्त-बन्धदत्त-शुल्कयौतकादीनि स्त्रीधनानि विभिन्नैः स्मृतिकारैः धर्मशास्त्रेषु प्रतिपादितानि । अतः षड्विधं स्त्रीधनमिति मनुवचने षड्विधोक्तिः न्यूनसंख्यावारणाय न त्वधिकसंख्याव्यवच्छेदाय इति मन्यव्यम् । याज्ञ्यवल्क्येन स्त्रीधनानां संख्याविषये किमपि नोक्तं तेन कानिचित् स्त्रीधनानि केवलं निर्दिष्टानि । तानि यथा–

पितृ-मातृ-पति-भ्रातृ-दत्तमध्यग्न्युपागतम् ।
आधिवेदनिकञ्चैव स्त्रीधनं परिकीर्त्तितम् ॥ इति ॥

सम्प्रति तेषां स्त्रीधनानां स्वरूपविषये चर्च्चां विधास्यामः ।

**अध्यग्नि** – विवाहकालेऽग्निसन्निधौ कन्यायै यद्धनं दीयते तदध्यग्निसंज्ञकं स्त्रीधनम् । अस्य स्वरूपं कात्यायनेनोक्तं यथा –

विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ ।
तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तितम् ॥ इति ॥

**अध्यावाहनिकम्** – भर्तृगृहं प्रति नीयमाना वधूः पितृमातृकुलात् यल्लभते तदध्यावाहनिकं नाम स्त्रीधनम् । अस्य स्वरूपमपि कात्यायनेनोक्तं जीमूतवाहनेन प्रतिपादितं यथा –

यत्पुनर्लभते नारी नीयमाना हि पैतृकात् ।
अध्यावाहनिकं नाम तत् स्त्रीधनमुदाहृतम् ॥ इति ॥

**प्रीतिदत्तम् -** विवाहकाले तत्पूर्वं तदनन्तरं वा प्रीतिवशतः स्त्रियै येन केनापि यद्धनं दीयते तत् प्रीतिदत्तमिति कथ्यते ।

**भ्रातृदत्तम्** – यदा कदापि भ्रात्रा भगिन्यै स्वेच्छया व्ययीकरणार्थं दीयमानं यद्धनं तद् भ्रातृदत्तं नाम स्त्रीधनम् ।

**मातृदत्तम्** – यदा कदाचित् मात्रा दुहित्रे स्वेच्छया व्ययीकरणार्थं दीयमानं यद्धनं तन्मातृदत्तं नाम स्त्रीधनम् ।

**पितृदत्तम् -** यदा कदाचित् पित्रा कन्यायै स्वेच्छया व्ययीकरणार्थं दीयमानं यद्धनं तत्पितृदत्तं नाम स्त्रीधनम् ।

**अन्वाधेयम्** –विवाहादनन्तरं कन्या भर्तृकुलात् श्वशुरादेः सकाशात् बन्धुकुलाच्च पितृमातृकुलात् यल्लभते तदन्वाधेयनामकं स्त्रीधनम् । प्रसङ्गेऽस्मिन्नुक्तं कात्यायनेन यथा –

विवाहात्परतो यत्तु लब्धं भर्त्तृकुलात् स्त्रिया ।
अन्वाधेयं तदुक्तन्तु लब्धं बन्धुकुलात्तथा ॥ इति ॥

पुनश्च प्रसङ्गेऽस्मिन् जीमूतवाहनेन भृगुवचनमुत्थाप्य प्रतिपादितं यत् –

ऊर्ध्वं लब्धन्तु यत्किञ्चित्संस्कारात् प्रीतितः स्त्रियाः ।
भर्त्तुः सकाशात् पित्रोर्वा अन्वाधेयं तु तद्भृगुः ॥ इति ॥

**आधिवेदनिकम्** –द्वितीयस्त्रीविवाहार्थिना पुरुषेण पूर्वस्त्रियै पारितोषिकरूपेण यद्धनं दत्तं तत् अधिविन्नायाः आधिवेदनिकं नाम स्त्रीधनमिति अधिकस्त्रीलाभार्थत्वात्तस्य ।

**भर्त्तृदत्तम् -**

यदा कदाचित् भर्त्रा भार्य्यायै स्वेच्छया व्ययीकरणार्थं दीयमानं यद्धनं तद् भर्तृदत्तं नाम स्त्रीधनम्। एतत् स्त्रीधनं भर्त्तृदायपदेनापि व्यवह्रियते । पत्यौ मृते सति स्त्री भर्त्तृदत्तं धनं यथेष्टं विनियुञ्जीत । जीवति च तस्मिन् तत् संरक्षेत् । प्रसङ्गेऽस्मिन् कात्यायनवचनमुत्थाप्य जीमूतवाहनेन प्रतिपादितं यत् –

भर्त्तृदायं मृते पत्यौ विन्यसेत् स्त्री यथेष्टतः ।

विद्यमाने तु संरक्षेत् क्षपयेत्तत् कुलेऽन्यथा ॥ इति ॥

अर्थात् भर्त्तृदत्तं धनं भर्तरि मृते स्त्री यथेष्टं विनियुञ्जीत जीवति तु तद्रक्षेत् । एतच्च तस्याः अमुक्तहस्तताज्ञापनार्थमुक्तम्। भर्ता स्त्रियै भर्तृदायं वा धनं द्विसहस्रकार्षापणं यावद् दद्यात्, न ततोऽधिकमिति तात्पर्यम्। अत एवोक्तं कात्यायनेन –

द्विसहस्रपरो दायः स्त्रियै देयो धनस्य तु।

यच्च भर्त्रा धनं दत्तं सा यथाकाममश्नुयात्॥ इति ॥

**पुत्रदत्तम् -** यदा कदाचित् पुत्रेण मात्रे स्वेच्छया व्ययीकरणार्थं दीयमानं यद्धनं, तत् पुत्रदत्तं नाम स्त्रीधनम्।

**बन्धुदत्तम्-** यदा कदाचित् सम्बन्धिभिः बन्धुभिश्च विवाहार्थिन्यै कन्यायै यद्धनं दीयते तत् बन्धुदत्तं नाम स्त्रीधनम्।

**शुल्कम्** – गृहादिकर्मभिः शिल्पिभिस्तत्कर्मकरणाय भर्त्रादिप्रेरणार्थं स्त्रियै यदुत्कोचप्रदानं तत् शुल्कमिति कथ्यते, तस्य मूल्यस्य प्रवृत्त्युत्पादकत्वात्। एतत् पारितोषिकं धनं न तु पारिश्रमिकम्। कात्यायनेनास्य लक्षणं कृतं यथा –

गृहोपस्करबाह्यानां दोह्याभरणकर्मिणाम्।

मूल्यं लब्धन्तु यत् किञ्चित् शुल्कं तत्परिकीर्त्तितम्॥ इति ॥

जीमूतवाहनेन व्यासवचनमुत्थाप्य प्रतिपादितं यत् – यदा नेतुं भर्त्तृगृहे शुल्कं तत्परिकीर्त्तितम्। अर्थात् भर्त्तृगृहं प्रति गमनार्थं भार्य्यायै यदुत्कोचादिकं प्रदीयते तत् शुल्कपदवाच्यं भवति । न तु पुनरासुरादिविवाहेषु यत् कन्याभ्यः शुल्कदानं तदुच्यते; तस्यासुरमात्रगोचरत्वात् तस्मिन् धने च कन्यायाः पितृभ्रात्रादीनामधिकारप्रसङ्गात्।

पुनश्च भर्त्तृगृहं प्रति गन्तुमनिच्छन्त्यै सुवासिन्यै भर्त्रादिभिः यदुत्कोचरूपं धनं प्रदीयते तदपि शुल्कपदवाच्य भवति। प्रसङ्गेऽस्मिन्नुक्तं व्यासेन –

**यदा नेतुं भर्त्तृगृहे शुल्कं तत्परिकीर्तितम्। इति।**

आसुरादिविवाहे कन्यापक्षेभ्यो दीयमानं यत् शुल्कं तदस्मात् शुल्कात् भिन्नम् । यतो हि तद्धने कन्यादातुरेवाधिकारः न तु कन्यायाः । अतः तत्रत्यं शुल्कपदस्य स्त्रीधनत्वाभावात, अत्रत्य शुल्कपदस्य च स्त्रीधनत्वेन परिगणनादासुरविवाहलब्धं शुल्कं नात्राभिप्रेतम्।

**सौदायिकम् -** सुदायसम्बन्धिभ्यो लब्धं सौदायिकम्। पितृपितृव्यपितामहादयः सुदायसम्बन्धिनः। तेभ्यः प्रसादादिना लब्धं सौदायिकम्। अस्य स्वरूपमुक्तं कात्यायनेन यथा–

ऊढया कन्यया वापि पत्युः पितृगृहेऽथ वा।

भ्रातुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम् ॥
सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते ।
यस्मात्तदानृशंस्यार्थं तैर्दत्तं तत् प्रजीवनम् ॥
सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम् ।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥ इति ॥

**परिशीलितग्रन्थसूचिः**


1. मनुस्मृति
2. याज्ञवाल्क्यस्मृतिः
3. संस्कृतसाहित्येतिहासः
4. पराशरस्मृतिः